पीतं भस्मोपमं हरितं सतिक्तं
धूम्रञ्च पित्तेन वमेत् सदाहम् ॥”
तस्याः श्लेष्मजाया रूपं यथा,—
“तन्द्रास्यमाधुर्य्यकफप्रसेक-
सन्तोषनिद्रारुचिगौरवार्त्तः ।
स्निग्धं घनं स्वादु कफाद्विशुद्धं
सलोमहर्षोऽल्परुजं वमेच्च ॥”
तस्यास्त्रिदोषजाया रूपं यथा,—
“शूलाविपाकारुचिदाहतृष्णा-
श्वासप्रमोहप्रबलाप्रसक्तम् ।
छर्द्दिस्त्रिदोषाल्लवणाम्लनील-
सान्द्रोष्णरक्तं वमतां नृणां स्यात् ॥”
असाध्याया लक्षणं यथा,—
“विट्स्वेदमूत्राम्बुवहानि वायुः
स्रोतांसि संरुध्य यदोर्द्ध्वमेति ।
उत्सन्नदोषस्य समाचितं तं
दोषं समुद्धूय नरस्य कोष्ठात् ॥
विण्मूत्रयोस्तत्समगन्धवर्णं
तृट्श्वासकासार्त्तियुतं प्रसक्तम् ।
प्रच्छर्द्दयेद्दुष्टमिहातिवेगा-
त्तयार्द्दितस्त्वाशु विनाशमेति ॥”
आगन्तुजाया लक्षणं यथा,—
“वीभत्सजा दौर्हृदजामजा तु
असात्म्यजा या क्रिमिजा च या हि ।
सा पञ्चमी ताञ्च विभावयेच्च
दोषोच्छ्रयेणैव यथोक्तमादौ ॥”
क्रिमिजाया लक्षणं यथा,—
“शूलहृल्लासबहुला क्रिमिजा च विशेषतः ।
क्रिमिहृद्रोगतुल्येन लक्षणेन च लक्षिता ॥
क्षीणस्य या च्छर्द्दिरतिप्रसक्ता
सोपद्रवा शोणितपूयमुक्ता ।
सचन्द्रिकां तां प्रवदेदसाध्यां
साध्याञ्चिकित्सेन्निरुपद्रवाञ्च ॥”
तस्या उपद्रवा यथा,—
“कासः श्वासो ज्वरो हिक्का तृष्णा वैचित्त्य-
मेव च ।
हृद्रोगस्तमकश्चैव ज्ञेयाश्छर्द्देरुपद्रवाः ॥”
इति माधवकरः ॥
तस्यौषधं यथा, गारुडे १८७ अध्याये ।
“अश्वगन्धाभया चैव उदकेन समं पिबेत् ।
हरीतकीकुष्ठचूर्णं लात्वा आस्यञ्च पूरयेत् ॥
शीतं पीत्वाथ पानीयं सर्व्वच्छर्द्दिनिवारणम् ।
गुडूचीपद्मकारिष्टधन्याकं रक्तचन्दनम् ॥
पित्तश्लेष्मज्वरच्छर्द्दिदाहतृष्णाप्रशमम्मितम् ॥”
अपिच ।
“बिल्वमूलञ्च समधु गुडूचीकथितं जलम् ।
पीतं हरेच्च त्रिविधां छर्द्दिं वै नात्र संशयः ।
पीता दूर्व्वा च्छर्द्दिं नश्येत् पिष्टा तण्डुलवारिणा ॥”
इति च गारुडे १९४ अध्यायः ॥*॥
अथ छर्द्देश्चिकित्सा ।
“आमाशयोत्क्लेशभवा हि सर्व्वा-
श्छर्द्द्यो मता लङ्घनमेव तस्मात् ।
विधीयते मारुतजां विना तु
संशोधनं वा कफपित्तहारि ॥”
अत्र च्छर्द्दौशब्दः ।
“हन्यात् क्षीरोदकं पीतं छर्द्दिं पवनसम्भवाम् ।
मुद्गामलकयूषो वा ससर्पिष्कः ससैन्धवः ॥
क्षीरोदकं नाशितस्य क्षीरस्योदकम् ।
गुडूचीत्रिफलानिम्बपटोलैः क्वथितं जलम् ।
पिबेत् मधुयुतं तेन छर्द्दिर्नश्यति पित्तजा ॥
हरीतकीनां चूर्णन्तु लिह्यान्माक्षिकसंयुतम् ।
अधोभागीकृते दोषे छर्द्दिः शीघ्रं निवर्त्तते ॥
विडङ्गत्रिफलाविश्वाचूर्णं मधुयुतं पिबेत् ।
विडङ्गप्लवशुण्ठीनां चूर्णं वा कफजां वमिम् ॥
प्लवं कैवर्त्तीमुस्तं गुड़तृणी इति लोके ।
पिष्ट्वा धात्रीफलं लाजान् शर्कराञ्च पलोन्मितान् ।
दत्त्वा मधुपलञ्चापि कुड़वं सलिलस्य च ॥
वाससा गालितं पीतं हन्ति छर्द्दिं त्रिदोषजाम् ।
गुडूच्या रचितं हन्ति हिमं मधुसमन्वितम् ॥
दुर्निवारामपि छर्द्दिं त्रिदोषजनितां बलात् ॥
एलालवङ्गगजकेशरकोलमज्जा-
लाजाप्रियङ्गुघनचन्दनपिप्पलीनाम् ।
चूर्णानि माक्षिकसितासहितानि लीढ्वा
छर्द्दिं निहन्ति कफमारुतपित्तजाताम् ॥
इति एलादिचूर्णम् ॥
अश्वत्थवल्कलं शुष्कं दग्धं निर्व्वापितं जले ।
तज्जलं पानमात्रेण छर्द्दिं जयति दुर्ज्जयाम् ॥
यथा त्रिकटुधान्याकजीरकाणां रजो लिहन् ।
मधुना नाशयेच्छर्द्दिमरुचिञ्च त्रिदोषजाम् ॥
बिल्वत्वचो गुडूच्या वा क्वाथः क्षौद्रेण संयुतः ।
छर्द्दिं त्रिदोषजां हन्ति पर्पटः पित्तजां तथा ॥
आम्रास्थिबिल्वनिर्यूहः पीतः समधुशर्करः ।
निहन्याच्छर्द्द्यतीसारं वैश्वानर इवाहुतिम् ॥
निर्यूहः क्वाथः ।
जम्ब्वाम्रपल्लवश्रुतं लाजरजःसंयुतं शीतम् ।
शमयति मधुना युक्तं वमिमतिसारं तथार्त्ति-
मुग्राम् ॥
वीभत्सजां हृद्यतमैरिष्टैर्दौर्हृदजां फलैः ।
लङ्घनैरामजां छर्द्दिं जयेत् सात्म्यै रसात्मजाम् ॥
क्रमिहृद्रोगवद्धन्याद्वमिं क्रमिसमुद्भवाम् ।
तत्र तत्र यथा दोषं क्रियां कुर्य्याच्चिकित्सकः ॥
इति छर्द्द्यधिकारः ।” इति भावप्रकाशः ॥
छर्द्दिः, [ स् ] स्त्री, ( छर्द्दयति छर्द्द्यते इति वा ।
छर्द्द वमने + “अर्च्चिशुचिहुसृपिच्छादिच्छर्द्दिभ्य
इसिः ।” उणां । २ । १०८ । इति इसिः । )
वमिः । इत्युणादिकोषः ॥ ( यथा, चरके
चिकित्सास्थाने २३ अध्याये ।
“तदग्निवेशस्य वचो निशम्य
प्रीतो भिषक्श्रेष्ठ इदं जगाद ।
छर्द्दौ षि यानीह पुरोदितानि
विस्तारतस्तानि निबोध सम्यक् ॥”)
छर्द्दिका, स्त्री, ( छर्द्दि + स्वार्थे कन् । स्त्रियां टाप् । यद्वा,
छर्द्दयतीति । छर्द्दि + ण्वुल् । टापि अत इत्वञ्च । )
छर्द्दिः । विष्णुक्रान्ता । इति राजनिर्घण्टः ॥
छर्द्दिकारिपुः, पुं, ( छर्द्दिकाया रिपुः नाशक इत्यर्थः । )
क्षुद्रैला । इति शब्दचन्द्रिका ॥
छर्द्दिघ्नः, पुं, ( छर्द्दिं हन्तीति । हन् + टक् । ) निम्बवृक्षः ।
इति रत्नमाला ॥ ( निम्बशब्देऽस्य विवरणं ज्ञेयम् ॥ )
छलं, क्ली, ( छो + वृषादित्वात् कलच् । यद्वा, छल +
अच् । ) स्खलितम् । शाठ्यम् । इति मेदिनी ।
ले, १७ ॥ ( यथा, मनुः । ८ । ४९ ।
“धर्म्मेण व्यवहारेण च्छलेनाचरितेन च ।
प्रयुक्तं साधयेदर्थं पञ्चमेन बलेन च ॥”
व्याजः । यथा, मार्कण्डेये । २५ । १० ।
“सा वै मदालसा पुत्त्रं बालमुत्तानशायिनम् ।
उल्लापनच्छलेनाह रुदमानमविह्वरम् ॥”
तात्पर्य्यान्तरेण प्रयुक्तस्य शब्दस्यार्थान्तरेण
कथनम् । यथा, अक्षपादसूत्रे । ५० ।
“वचनविघातोऽर्थविकल्पोपपत्त्या च्छलम् ॥”
“अर्थस्य वाद्यभिमतस्य यो विकल्पो विरुद्धः
कल्पः अर्थान्तरकल्पनेति यावत् तदुपपत्त्या
युक्तिविशेषेण यो वचनस्य वादुक्तस्य विघातो
दूषणं तच्छलमित्यर्थः । वक्तृतात्पर्य्याविषयार्थ-
कल्पनेन दूषणाभिधानमिति फलितम् । तात्-
पर्य्याविषयत्वं विशेष्ये विशेषणे संसर्गे वा । यथा,
नेपालादागतोऽयं नवकम्बलवत्त्वादित्यत्र नव-
संख्यापरत्वकल्पनयाऽसिद्ध्यभिधानम् । प्रमेयं
धर्म्मत्वादित्यत्र पुण्यत्वार्थकल्पनया भागासिद्ध्य-
भिधानम् । वह्निमान् धूमादित्यत्र धूमावयवे
व्यभिचाराभिधानम् । तत्त्रिविधम् । वाक्छलं
सामान्यच्छलमुपचारच्छलञ्च ॥” “छलं नाम
परिशठमर्थाभासमपार्थकं वाग्वस्तुमात्रमेव ।
तद्द्विविधं वाक्छलं सामान्यच्छलञ्च । तत्र वाक्-
छलं नाम यथा कश्चिद्ब्रूयात् नवतन्त्रोऽयं
भिषगिति भिषग् ब्रूयात् नाहं नवतन्त्र एकतन्त्रो-
ऽहमिति । परो ब्रूयात् नाहं ब्रवीमि नव
तन्त्राणि तवेति अपितु नवाभ्यस्तं ते तन्त्रमिति
भिषग् ब्रूयात् न मया नवाभ्यस्तं तन्त्रं अनेक-
शताभ्यस्तं मया तन्त्रमिति । एतद्वाक्छलम् ।
सामान्यच्छलं नाम यथा, व्याधिप्रशमनायौषध-
मित्युक्ते परो ब्रूयात् सत् सत्प्रशमनायेति भवा-
नाह सत्रोगः सदौषधं यदि च सत्प्रशमनाय
भवति सत्कासः सत्क्षयः सत्सामान्यात् कासस्ते
क्षयप्रशमनाय भविष्यतीति एतत्सामान्य-
च्छलम् ॥” इति चरके विमानस्थाने अष्टमे
अध्याये ॥ )
छल्लिः, स्त्री, ( छदं छाद्यतां लातीति । ला +
बाहुलकात् किः । ) त्वक् । इति शब्दरत्नावली ॥
छाल इति भाषा ॥
छल्ली, स्त्री, ( छदं छाद्यतां लातीति । ला + किः ।
ततः कृदिकारादिति वा ङीष् । ) वीरुत् ।
सन्तानः । वल्कलम् । कुसुमविशेषः । इति
मेदिनी । ले, १८ ॥
छविः, स्त्री, ( छ्यति रूपं करोति यद्वा
छ्यति छिनत्ति दूरीकरोति मालिन्यादिकमनेन-
मिति । छो + “कष्युषिच्छविस्यविकिकीदिवि ।”